सनातन वैदिक संस्कृतेः पुनः संस्थापकाः,

ज्योतिष्पीठाधीश्वराणां परम गुरुदेवानां ब्रह्मानन्दसरस्वतीनां

परमप्रिय शिष्याः, स्व गुरु प्रदत्त भावातीत ध्यान प्रणेतारः,

महर्षि पतञ्जलि प्रतिपादित सिद्धि विज्ञानस्य लक्षाकधिजनेषु

अनुभव प्रदातारः, संपूर्ण वैदिक वाङ्मयस्य चत्वारिंशत्शाखायाः

संकलनं कृत्वा मानवीय चेतनायां जागृत कर्त्रे पथ प्रदर्शितारः,

मानवीय शरीरे वैदिक वाङ्मयस्य दर्शनं कारयित्वा अहं ब्रह्मास्मीति

वैदिक सिद्धान्त प्रतिपादकाः, स्वगुरु प्रदत्त ज्ञानस्यामु भूतिं कारयित्वा
समस्त विश्वे तस्यानुभूत्याः ज्ञानप्रदातारः, द्विशताधिकेषु देशेषु

भारतीय वैदिक ज्ञान प्रचारकाः, योगस्थः कुरु कर्माणि इत्यादि

बहूनां वैदिक वाङ्मयस्य सिद्धान्तानां प्रायोगिक स्वरूपं प्रदर्शितारः,

अहं ब्रह्मास्मीति ज्ञानेन ब्रह्मा भवति सारथीति ज्ञानं स्व शिष्येभ्यः
मार्गदर्शनकर्तारः, अनेकदेशेषु महर्षि वैदिक

विश्वविद्यालयस्यायुर्वेदप्रबन्धन विश्वविद्यालयानां वैदिक विद्यापीठादि

महर्षि विद्यालयानां स्थापनाकर्तारः, विश्वशान्तिराष्ट्रस्य संस्थापकाः

महर्षि महेशयोगिवर्याः विजयन्तेतराम्।